# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ४ | गुणा: - ७० |
| विषय: - कर्मकाण्डम् | (C.E.- 1.1.1. Old) | |
| दिनाङ्क: - १८/१२/२०१८ | सर्वदेवपूजाप्रयोग: । | समय: -२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु द्वयो: मन्त्रयो: व्याख्या विधेया । (५)**

*(१) आनोभद्रा: क्रतवो यन्तुविश्वतोऽदब्धासो अपरीतास उद्भिद: ।*
*देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥*

*(२) चन्द्रमा मनसो जातश्चक्षो: सूर्योऽअजायत ।*
*श्रोत्राद्वायुश्चप्राणश्च मुखादग्निरजायत ॥*

*(३) भद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: ।*
*स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेम देवहितं यदायु: ॥*

**प्रश्न: २ प्राणायामस्योपादेयता तस्य प्रयोगविधिं च विवृणुत । (१०)**

**अथवा**

*कर्मकाण्डे भद्रसूक्तस्य किमस्ति महत्त्वं विवेचयत ।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितेषु द्वयो: मन्त्रयो: व्याख्या विधेया । (५)**

*(१) नमस्ते रुद्र मन्यव उतोत इषवे नम: । बाहुभ्यामुत ते नम: ॥*

*(२) आजिघ्र कलशं मह्या त्वा विशन्त्विन्दव: ।*
*पुनरूर्जा निवर्तस्व सा न: सहस्रं धुक्ष्वोरूधारो पयस्वती पुनर्माविशताद्रयि: ॥*

*(३) रक्षोहणो वलगहन: प्रोक्षामि वैष्णवान्रक्षोहणो वलगहनोऽवनयामि वैष्णवान् ।*
*रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवान् ॥*

**प्रश्न: ४ पञ्चायतनदेवानां समन्त्रकं वर्णनं कुरुत । (१०)**

**(अथवा)**

*प्रधानसङ्कल्पं विलिख्य तस्यावश्यकतां स्पष्टयत ।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितेषु द्वयो: मन्त्रयो: व्याख्या विधेया । (५)**

*(१) यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।*

*ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥*

(२) *या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।*
*मनै नु बभ्रूणामहꣳशतं धामानि सप्त च ॥*

(३) *पञ्च नद्यः सरस्वतीमपि यन्ति सस्त्रोतसः ।*
*सरस्वती तु पञ्चधा सो देशोऽभवत्सरित् ॥*

**प्रश्नः ६ कस्यचिदेकस्य देवस्य षोडशोपचारपूजनविधिं समन्त्रकं प्रतिपादयत । (१०)**

**(अथवा)**

*षोडशोपचारक्रमं विलिख्य तत्र प्रयुक्तद्रव्याणां विवरणमुपस्थापयत ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितेषु दशप्रश्नाः एव समाधेयाः । (१०)**

(१) *आचमनं कतिवारं करणीयम् ?*
(२) *शिखाबन्धनस्य मन्त्रः कः ?*
(३) *इदानीं कस्य मन्वन्तरस्य प्रचलनं भवति ?*
(४) *भारतवर्षस्य कस्मिन् द्वीपे वयं तिष्ठामः ?*
(५) *काः पञ्चायतनदेवताः ?*
(६) *वरुणावाहनमन्त्रस्य द्रष्टाऋषिः कः ?*
(७) *कलशस्य दक्षिणे कस्य वेदस्यावाहनं भवति ?*
(८) *घण्टापूजनस्य मन्त्रः कः ?*
(९) *दूर्वाङ्कुरामन्त्रः कः ?*
(१०) *अभिषेककर्मणि पत्न्याः स्थानं कुत्र भवति ?*
(११) *'गणपतिम्' इति शब्दस्य कोऽर्थः ?*
(१२) *पुरुषसूक्ते कति मन्त्राः सन्ति ?*
(१३) *पञ्चामृतनिर्माणे कानि द्रव्याणि ?*
(१४) *आदित्यदेवस्य मन्त्रः कोऽस्ति ?*
(१५) *वरुणकलशे कति देवानामावाहनं भवति ?*

--oo--